# Dharmarajakritam Purushottama Stotram

# धर्मराजकृतं पुरुषोत्तमस्तोत्रम् २

## Document Information

Text title : Dharmarajakritam Purushottama Stotram

File name : dharmarAjakRRitaMpuruShottamastotram02.itx

Category : vishhnu, vishnu, brahmapurANa, stotra, aShTaka

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 45/60-67||

Latest update : September 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 29, 2024

*sanskritdocuments.org*

# धर्मराजकृतं पुरुषोत्तमस्तोत्रम् २

धर्मराज उवाच ।
नमस्ते भगवन्देव लोकनाथ जगत्पते ।
क्षीरोदवासिनं देवं शेषभोगानुशायिनम् ॥ ६० ॥

वरं वरेण्यं वरदं कर्तारमकृतं प्रभुम् ।
विश्वेश्वरमजं विष्णुं सर्वज्ञमपराजितम् ॥ ६१ ॥

नीलोत्पलदलश्यामं पुण्डरीकनिभेक्षणम् ।
सर्वज्ञं निर्गुणं शान्तं जगद्धातारमव्ययम् ॥ ६२ ॥

सर्वलोकविधातारं सर्वलोकसुखावहम् ।
पुराणं वुरुषं वेद्यं व्यक्ताव्यक्तं सनातनम् ॥ ६३ ॥

परावराणां स्रष्टारं लोकनाथं जगद्गुरुम् ।
श्रीवत्सोरस्कसंयुक्तं वनमालाविभूषितम् ॥ ६४ ॥

पीतवस्त्रं चतुर्बाहुं शङ्खचक्रगदाधरम् ।
हारकेयूरसंयुक्तं मुकुटाङ्गदधारिणम् ॥ ६५ ॥

सर्वलक्षणसम्पूर्णं सर्वेन्द्रियविवर्जितम् ।
कूटस्तमचलं सूक्ष्मं ज्योतीरूपं सनातनम् ॥ ६६ ॥

भावाभावविनिर्मुक्तं व्यापिनं प्रकृतेः परम् ।
नमस्यामि जगन्नाथमीश्वरं सुखदं प्रभुम् ॥ ६७ ॥

इति ब्रह्मपुराणे पञ्चाशीतितमाध्यायान्तर्गतं
धर्मराजकृतं पुरुषोत्तमस्तोत्रं समाप्तम् ।

ब्रह्मपुराण । अध्याय ४५/६०-६७ ॥

brahmapurANa . adhyAya 45/60-67..

Proofread by PSA Easwaran

*Dharmarajakritam Purushottama Stotram*
pdf was typeset on September 29, 2024

Please send corrections to *sanskrit@cheerful.com*